श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३८

*कृष्णावतारवर्णनम्*

आनन्दरूप भगवन्नयि तेऽवतारे प्राप्ते प्रदीप्तभवदङ्गनिरीयमाणैः।
कान्तिव्रजैरिव घनाघनमण्डलैर्द्यामावृण्वती विरुरुचे किल वर्षवेला॥ १ ॥

आशासु शीतळतरासु पयोदतोयै-
राशासिताप्तिविवशेषु च सज्जनेषु।
नैशाकरोदयविधौ निशि मध्यमायां
क्लेशापहस्त्रिजगतां त्वमिहाऽविरासीः॥ २ ॥

बाल्यस्पृशाऽपि वपुषा दधुषा विभूतीः
उद्यत्किरीटकटकाङ्गदहारभासा।
शङ्खारिवारिजगदापरिभासितेन
मेघासितेन परिलेसिथ सूतिगेहे॥ ३ ॥

वक्षस्थलीसुखनिलीनविलासिलक्ष्मीमन्दाक्षलक्षितकटाक्षविमोक्षभेदैः।
तन्मन्दिरस्य खलकंसकृतामलक्ष्मीमुन्मार्जयन्निव विरेजिथ वासुदेव॥ ४ ॥

शौरिस्तु धीरमुनिमण्डलचेतसोऽपि
दूरस्थितं वपुरुदीक्ष्य निजेक्षणाभ्याम्।
आनन्दबाष्पपुळकोद्गमगद्गदार्द्र-
स्तुष्टाव दृष्टिमकरन्दरसं भवन्तम्॥ ५ ॥

देव प्रसीद परपुरुष तापवल्लिनिर्लूनदात्र समनेत्र कलाविलासिन्।
खेदानपाकुरु कृपागुरुभिः कटाक्षैरित्यादि तेन मुदितेन चिरं नुतोऽभूः॥ ६ ॥

मात्रा च नेत्रसलिलास्तृतगात्रवल्या
    स्तोत्रैरभिष्टुतगुणः करुणालयस्त्वम्।
प्राचीनजन्मयुगळं प्रतिबोध्य ताभ्यां
    मातुर्गिरा दधिथ मानुषबालवेषम्॥ ७ ॥

त्वत्प्रेरितस्तदनु नन्दतनूजया ते
    व्यत्यासमारचयितुं स हि शूरसूनुः।
त्वां हस्तयोरधृत चित्तविधार्यमार्यै-
    रम्भोरुहस्थकळहंसकिशोररम्यम्॥ ८ ॥

जाता तदा पशुपसद्मनि योगनिद्रा
    निद्राविमुद्रितमथाकृत पौरलोकम्।
त्वत्प्रेरणात् किमिव चित्रमचेतनैर्यद्-
    द्वारैः स्वयं व्यघटि सङ्घटितैः सुगाढम्॥ ९ ॥

शेषेण भूरिफणवारितवारिणाऽथ
    स्वैरं प्रदर्शितपथो मणिदीपितेन।
त्वां धारयन् स खलु धन्यतमः प्रतस्थे
    सोऽयं त्वमीश मम नाशय रोगवेगान्॥ १० ॥

**********